सिद्धार्थ आह ।

"विवर्जिता: सर्पशिरा यथा बुधै-
र्विगर्हिता मीढ़घटा यथाशुचि: ।
विनाशका: सर्व्वसुखस्य छन्दक
ज्ञात्वा हि कामान्न विजायते रति: ॥"
छन्दक शृणु यानि दु:खशतामर्षिता पूर्व्व-
जन्मान्तरे ।
बन्धनारुन्धनाल्लाड़नात्तर्ज्जना: कामहेतो-
र्मया नो च निर्व्विदभूत् ॥
संस्कृतमानसं प्रमदवशगतश्च
मोहाकुलं दृष्टिजालावृतम् ।
अन्यश्रुतं पुरा आत्मसंज्ञा-
ग्रहाकारका वेदनावीतिशृणा इमे ॥
धर्म्माज्ञानत: सम्भूता चलचपला-
नित्यमेघै: समा विद्युद्भि: सदृशा: ।
ओसबिन्दूपमा रिक्ततुच्छा असारा:
अनात्मा च शून्यस्वभावा इमे सर्व्वश: ॥
स्वयमहमभिरुह्य नावामिमात्मानाऽवतीर्य
संसार ओघैरहं तारयिष्येऽनन्तं जगत् ।
शोकसंसारकान्तारदोषोर्म्मिरागग्रहा-
व्याकुले वैराकुले दुस्तरे एव चित्तं मम ॥
तदात्मनोत्तीर्य इदं भवार्णवं
सवैरदृष्टिग्रहक्लेशराक्षसम् ।
स्वयं तरित्वा च अनन्तरं जगत्
स्थलेऽन्तरौचे अजरामरे शिवे ॥"

ललितविस्तरे, १५ अध्याये ।

अतश्छन्दक ! प्रव्रजाम्यधुनैव सत्वरमानयाश्वम् । तथानुष्ठिते सिद्धार्थोऽसौ स्त्रीतनयगुरुजनान् सर्व्वान् राज्यमैश्वर्य्यञ्च विहायाश्वमारुह्य निर्गत: । निजनगराद्दादशयोजनदूरस्थितं मल्लराज्यं प्राप्य तत्रैव वशिष्ठाश्रमसन्निधौ छन्दकमश्वसहितं विसृज्य कौषेयमपहाय पिधाय वल्कलवासमेकाकी वैशालीं नामनगरीमुपतस्थे । तत्र आराढ़कालामनामा जिनपुरुषस्त्रिशतकशिष्यैरवात्सीत्, सिद्धार्थोऽस्य शिष्योऽभूत् । आहैकदा गुरु:, पवित्रचेता ऋजुर्भक्तिमान् पुरुष एवालं ब्रह्मचर्य्यं ग्रहीतुम्, लब्धुञ्च सर्व्वमैश्वर्य्यम् । हृदि यस्य विमलो निर्व्वाणप्रदीप: प्रदीप्तस्तम:स्तोमग्रसनपटुर्भवस्य । न तस्य सुखदमैश्वर्य्यविजृम्भितगुरुवचनम् । तत: सप्तशतीं शिष्यततिन्दधानस्य रुद्रकनाम्न: साधो: समीपं गत्वा तत्वानेन सम्भाषणं गयशीर्षं जगाम । तत्रोद्भावितमनेन यद् ब्राह्मणा: श्रमणाश्च बोधस्वरूपं लब्धुमविशुद्धं कायमानसं नियोजयन्ति तदग्निमुत्पादयितुमार्द्रकाष्ठद्वयघर्षणमिव वैफल्यं भजते । शुष्ककाष्ठखण्डद्वयघर्षणेन यथा लब्धमनोरथा मानवास्तद्वत् कायमनसोर्विशुद्धयो: सतो: स्वतश्च बोधलाभ: शक्य: । तत:परमसौ बोधिसत्त्वो गत्वा ग्राममुरुविल्वाख्यं विजनं तत्रैवोषितुं मनो दधे । परमयत्नेनात्रैव कायशुद्धिं चित्तशुद्धिञ्च विधाय आस्फानकाख्यं दुर्द्धरं ध्यानं दधार । अत्रासौ कस्मिंश्चिद्दिवसे बदरीमेकिकां कस्मिंश्चिद्वा तण्डुलमेकं कदाचिद्वैकमात्रं कलायं भक्षयित्वा कस्मिंश्चिदुपोषणेन वा कालं विलङ्घ्य शुष्कच्छविर्मसीवर्णो बभूव । ततोऽसौ देहमित्थं निभज्य लब्धुं सम्बोधं न समर्थोभवेयमिति विचिन्त्य पोषणकरमाहारं जग्राह ।

दिवसेऽस्मिन् शुद्धोदन: स्वप्नं ददर्श प्रिय: पुत्रो मे मणिमुक्तादिविभूषितवारणरूपेण उदुम्बरतरुमारुरोह । त्रैलोक्यलोका: पूजनायास्यागच्छन्तीव, यशोधरापि गोपापरनाम्नी ददर्श स्वप्नं विविधम् स्वयं शाक्यसिंहश्च पश्च, यथा जगदखिलं शय्या मे, बिम्बफलमिव सुमेरुशिखरमुपधानीभूतं मे, वामदक्षिणकरद्वयं मे प्राच्यपश्चिमसमुद्रोपरि पादावुभौ मे दक्षिणाब्धौ प्लवन्ते, नाभिकमलान् मे समुत्थितै: शिरिकातृणैश्चापूरितमखिलं नभ: । ततश्चोत्थायासौ उरुविल्वोषिताया: सुजातानामिकाया नार्य्या: सकाशात् भिक्षां जग्राह ।

इत: सिद्धार्थो ध्यानं दधार, निर्व्वाणे पथि तस्य सततं परिपन्थी सन्नपि दुर्निवारो मार: पराजितो ध्यानवीरेण योगिसिंहेन पलायनं चक्रे । ततस्तस्यैव कन्दर्पस्य तनये यतिते तन्द्रा रतिश्च योगिप्रवरस्य मोहनाय, विफलानि तु जातान्यनयोर्मनोरथानि । तत: सर्व्वेभ्य: क्लेशेभ्यो विमुक्त: सिद्धार्थो बोधञ्च विमलं लेभे । तदासावधिरूढ़योग: मनस्यस्य मुकुरे प्रतिफलितं सकारणमखिलं जगत् । ततश्च चिन्तयामास स: जीवानां जन्म, तेषु च जीवस्य संयोगो वियोगश्चैव दु:खदु:खान्येतानि । न जानीते मानवस्तन् मोहजालेनावृतो दुर्व्विषहं दु:खं सहत इति । तत: कस्मादागतं जरामरणमिति चेतसा कृते प्रश्ने तेनैव निश्चिनोति स:, यज्जन्मन एवागच्छति जरामरणमिति, कुतस्तर्हि ह्यागतं जन्म किमस्य वा कारणम् ? संसारादस्माज्जातिरतएव भव एव कारणमत्र । भवस्तर्हि कुत आयत: किमस्य वा कारणं ? उपादानादागतो भवस्तदुपादानमेवास्य कारणम् । कस्मादुपादानमायातन्तर्हि किमस्य वा कारणं ? तृष्णाया आगतमुपादानमतस्तृष्णैव कारणमस्येति । तर्हि कुत आयाता तृष्णा कारणं वा किमस्या: ? वेदनाया आगता तृष्णा अतो वेदनव कारणमस्या: । कुत आयाता वेदना, अस्या वा किं कारणम् ? स्पर्शादायाता वेदना, अत: स्पर्श एव कारणं वेदनाया इति । स्पर्शस्तर्हि कुत आयात: किं वा कारणमस्य ? । षड़ायतनादागत: स्पर्शस्ततोऽस्य कारणं स एवेति । कुत आयातं षड़ायतनं कारणं वा किमस्य ? नामरूपाभ्यामागतं षड़ायतनम् अतएवास्य कारणमेव तद्दति । कुतस्तर्ह्यायाते नामरूपे कारणं वा किमनयो: ? विज्ञानादागते नामरूपेऽतोऽनयो: कारणं विज्ञानमिति । कुत आयतं विज्ञानन्तर्हि कारणं वा किमस्य ? संस्काराद्दागतं विज्ञानमतोऽस्य कारणं स एवेति । संस्कारस्तर्हि कुत आयात: कारणं वा किमस्य ? अविद्याया आगत: संस्कारस्ततोऽस्य कारणमविद्यैवेति ।

स्फुटमिदानीमविद्यैव कारणं जगतोऽखिलस्य । ततो विलोमेन प्रकटीभूतं यत् अविद्याया: संस्कार: संस्काराद् विज्ञानम्, विज्ञानान्नामरूपे ताभ्यां नामरूपाभ्यां षड़ायतनम्, षड़ायतनात् स्पर्श:, स्पर्शाद् वेदना, वेदनायास्तृष्णा तृष्णाया उपादानम् उपादानात् संसार: संसाराज्जाति: जातेर्जरामरणमिति ।

प्रकारेणानेनोत्पन्नो दु:खद्रुमो जीवानाम् । तदिदानीं प्रतिभातं अविद्यैव मूलमस्य पादपस्य निरस्तायामविद्यायां कुतो दु:खप्रसङ्ग: क्रमेण तस्मात् जन्मजरामरणं दु:खं चिन्ताक्लेश: पीड़ा च सर्व्वं दूरे पलायन्ते । एवं जीवानामुदेति चित्ताकाशे धर्म्मालोक: । उदिते तस्मिन् मन:संयोगेन ज्ञानं दर्शनं विद्या स्मृतिर्बुद्धिश्च सर्व्वं प्रत्यक्षीभवति । तत इदानीं सिद्धार्थो बुद्ध: सञ्जात: ।

ततश्चागतोऽत्र अकानगर्य्या राजा बुद्धस्य श्रीपादपद्मसन्दर्शनाय । सोऽस्मै ह्युपदिदेश "अहिंसा परमो धर्म्म: ।" इत्यतश्चमनुतिष्ठ तद्धर्म्मं निर्व्वाणमोक्षञ्चाप्स्यसीति ।

ततोऽसौ बुद्धो नैरञ्जननाम्नीं नदीं चिरिकावनञ्च त्यक्त्वा उज्ज्वलमुपवनं प्रतस्थे । अत्र स जनपदशाद्वासरानुपोषणमङ्गीकृतवान् । ततस्तस्मात् स्थानान्निर्गत्य गयां नाह्वालं कुन्दहिरं लोहितवस्तुकं गन्धपुरं सारथिपुरञ्च क्रमेण गत्वा त्यक्त्वा च काशिकामुपतस्थे, अत्रास्य कौण्डिन्य: सिद्ध: शिष्योऽभूत् बुद्धस्तं नाम्ना ज्ञानकौण्डिन्यं चकार । कालेऽस्मिन् बहुसंख्यका लोका आगत्यागत्य बुद्धस्य शिष्या अभवन् ।

तत: काशीधाम्न: स उरुविल्वास्थितं सेनानीनामकं ग्रामं प्रययौ तत्र नैरञ्जनतीरे नाम्ना उरुविल्वाकाश्यप: शताधिकविंशतिवया: पञ्चशतशिष्यैरनुगत: प्रतिवसति स्म । लोका जानन्त्यमुमर्हन्निति । बुद्धो गत्वास्य समीपं प्रदायास्मै ज्ञानोपदेशं विमलं शिष्यं तं चकार । दृष्ट्वा शक्तिमलौकिकीं बहवो लोका विस्मिता धर्म्मं बौद्धं गृहीतवन्त: ।

तदा विम्बसारो मगधराज: शुश्राव गयशीर्षं बुद्धदेव: प्राप्त इति । गत्वा समीपं प्रपूज्य च परमया भक्त्यास्य शिष्यत्वं स्वीचकार । ततो मागधो स्वीयां नगरीं गन्तुं निमन्त्रयामास तम् । जग्राहास्य प्रणयं बुद्ध: । शारीपुत्रोऽत्र मौद्गलायनोऽस्य शिष्योऽभवत् ।

श्रुतवान् कोशलपति: प्रसेनजित् बुद्धो देवो राजगृहे जेतवने प्रतिवसत्यधुनेति । गत्वा च तत्र त्वरितं बुद्धसन्निधिमुवाच, पूर्णकाश्यप: परिव्राजकगोशाल: वैरापुत्त्रसञ्जय: अजितकेश: